# पाठ-१

# जीवन संदेशः

**सारान्शः**

सम्मानेन भक्षितं अन्नं शक्ति वर्धकं भवति।क्रोधं शान्त भावेन ,दुष्टं सद्भावेन ,कृपणं दानेन ,असत्यं च सत्येन जयेत, सज्जनानां गृहे आतिथ्य सत्कार हेतुः कुशनिर्मितं आसनं ,आश्रयार्थं भूमिः ,पानार्थं जलं तथा सम्मानार्थम् अतिप्रिय,सत्यं ,मधुर वचनानां न्यूनता न भवति ।

संतोष रूपिणः सुखमाप्नुवन्ति नतु धनलुब्धाः।अधमः केवलं धनमिच्छन्ति ,मध्यमाः धनमानं च उभे वाञ्छन्ति किन्तु उत्तम जनानां कृते तु मानम् एव धनं वर्तते । यः सद्ग्रन्थानां नियमपुर्वकं अध्ययनं करोति तस्य कृते स्वास्थ्य वर्धकानां पदार्थानां उपलब्धता सहजमेव भवति। यस्य वान्मनसी शुद्धता भवति सैव वेदान्तोपगतं फलमाप्नोति।

**मुख्य बिन्दवः**

- मनुस्मृति इति मानव समाजस्य प्रथमं संविधानम्। मनुस्मृति प्रचीनतमः धर्मग्रन्थः अस्ति।




- महाभारत वेदव्यास महर्षेः रचना अस्ति। जयः(८८०० श्लोकाः) , भारतः(२४००० श्लोकाः) च महाभारतस्य एव नामनी स्तः।




- कौटिल्य,विष्णुगुप्त चाणक्यस्यैव नामनी स्तः। चाणक्यः चन्द्रगुप्त मौर्यस्य महामन्त्री आसीत्। चाणक्येन प्रणीतः ग्रन्थः एव चाणक्य नीतिः।




**अवगच्छामः**

काव्यः कविता अथवा पद्यः, साहित्यस्य तद्विधा अस्ति यस्मिन् कश्चित कथा अथवा मनोभावं कलात्मकरूपेण भाषा माध्यमेन क्रियते। काव्यशैलीः - गद्य ,पद्य,चम्पू । आचार्य विश्वनाथानुसारं " छन्दो बद्ध पदं पद्यं " पद्य लक्षणं कृतं।

**आवश्यकोऽयं ज्ञानम्**

- पूजितं ह्यशनम्- अन्नं सदा सम्माननीयम्। 'अन्नं वै ब्रह्म' इति उक्तम् । अन्नस्य उत्पादने, निष्पादने, प्रदाने च सर्वथा शुद्धिः भवेत्। श्रीकृष्णः दुर्योधनस्य व्यंजनानि विहाय विदुरस्य शाकम् अखादत्। यथा अन्नं तथा मनः । उक्तं च 'आहारशुद्धौ सत्त्वशुद्धिः । दत्तम् अन्नं सदा सत्कृत्य एव भोक्तव्यम् ।
- सन्तोषामृततृप्तानां यत्सुखं- 'सन्तोषः' ईदृशः धनम् अस्ति येन जनः परमं सुखं लभेत् । सन्तोषः परमं सुखम् । धनस्य तृष्णा विशाला चेत् तर्हि कुतः सुखम् । उक्तं च भर्तृहरिणास तु भवति दरिद्रः यस्य तृष्णा विशाला । मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ।।

- स्वाध्यायस्य महत्त्वं पुरातनकालादेव प्रसिद्धम्। आचार्यः शिष्यम् उपदिशति स्म स्वाध्यायान्मा प्रमदः 'तपःस्वाध्याय प्रवचनाभ्यां न प्रमदितव्यम्' इति । स्वाध्यायम् अस्माकं जीवनस्य प्रथमम् अङ्गम् आसीत्। स्वाध्यायेन एव ज्ञानवृद्धिः भवति ।

**व्याकरण बिन्दवः शब्द भण्डाराश्च**

- **संयोगः** - संयोगे वर्णाः अन्यवर्णैः सह संयुज्यन्ते तत्र कश्चन विकारः न भवति असौ वर्णसंयोगः इति कथ्यते।
  **यथा** - भुक्तम् + उभयम् = भुक्तमुभयम्
  बलम् + ऊर्जम् = बलमूर्जम्
- **संधिः** - यदि पूर्वपदस्य अन्तिमवर्णः उत्तरपदस्य पूर्ववर्णेन सह मिलति तत्र किंचित् परिवर्तनं च भवति, तदा तत् 'सन्धिः' इति कथ्यते।
  **यथा** - हि + अशनम् = ह्यशनम् ,
  नाशयेत् + इदम् = नाशयेदिदम्
- **शब्दार्थाः**-
  1. पूजितं - सम्मानित
  2. कदर्यं - कंजूस को,
  3. न उच्छिद्यन्ते - समाप्त नहीं होते,
  4. सन्तोषामृततृप्तानां - सन्तोष रूपी अमृत से तृप्त हुए लोगों का,
  5. शान्तचेतसाम् - शान्त चित्त वालों का
  6. स्वाध्यायम् - सद्ग्रन्थों का अध्ययन,
  7. वाङ्गनसी - वाणी और मन,
  8. वेदान्तोपगतं फलम् - वेदान्त में वर्णित फल,

**योग्यतां वर्धयत**

अध्यायस्य नाम्नैव स्पष्टं भवति ,यत् अस्मिन् अध्याये जीवनं कथं सुखपूर्वकम् यापनम् कुर्मः,तत् भोजनाधारितं ,स्वभावाधारितं,आतिथ्याधरितं इत्यादयः भवितुमर्हन्ति।एतादृशाः श्लोकाः अन्येषु अपि स्थानेसु वर्णिताः सन्ति।ये जीवन संदेशं वर्णयन्ति।

अध्यायागत पद्याधारितं अन्य पद्यानां अर्थं तुलनात्मक रूपेण प्रयोगं कर्तुं शक्यते।

**पद्यानां संप्रेष्यः**

पाठगत पद्यानां प्रयोगेण सर्वाङ्गीण विकास हेतुः मार्गदर्शनं प्रप्यते। प्रथम श्लोके- भोजनेन प्रापणीय गुणाः स्पष्टिताः सन्ति।द्वितीय श्लोके- केन कथं जयेम तद् वर्णितम् अस्ति। तृतीय श्लोके- सज्जनानां गुण वर्णनम् प्रगाढ हृदयं च वर्णितं वर्तते।चतुर्थ श्लोके- संतोषरुपीणां तथा धनलुब्धानां गुणं वर्णितं अस्ति।पञ्चम श्लोके- अधम,मध्यमोत्तं जनानां धनं वर्णितं वर्तते।षष्ठ श्लोके- स्वाध्यायप्रिय जनानां ज्ञान वृद्धिः कथं भवति तस्य वर्णनम् उपलभ्यते।सप्तम श्लोके- वाङ्गनसा शुद्ध जनानां वेदान्तोक्तं फलं प्राप्तिर्भवति।

**अधिकाङ्क्षानाम् अर्जनं कथं भवेत्**

- पद्यानां सम्यक् रूपेण अध्ययनं कृत्वा तेषाम् अर्थम् अवगच्छेत्।
- पद्येषु आगतानां कठिन शब्दानां व्याकरणात्मक स्वरूपं जानीयात्।
- पद्यानां समानार्थी पद्यसूक्त्यादिनाम् अपि जानीयात्।

**स्व मूल्याङ्कनम् कुरुत**

- श्लोकानां अर्थम् अवगम्य तेषां समानार्थी श्लोकानां अन्वेषणं कृत्वा भावानां मेलनं कुरुत।
- विद्यार्थिनां,गृहस्थीनां च उपयोगी श्लोकानां चयनं कृत्वा विभाजनम् एवं तान् कण्ठस्थं कुरुत।
- संयोग सन्धेः परिभाषां उद्धृत्य उदाहरणं वर्णयत।
- अकारान्त पुल्लिङ्ग- नपुन्सकलिङ्गयोः शब्दानां रूपेषु भेदं वर्णयत।